শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৩৬

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৩৬

*পরশুরামাৱতারৱর্ণনম্*

অত্রেঃ পুত্রতযা পুরা ত্বমনসূযাযাং হি দত্তাভিধো
জাতঃ শিষ্যনিবন্ধতন্দ্রিতমনাঃ স্বস্থশ্চরন্ কান্তযা।
দৃষ্টো ভক্ততমেন হেহযমহীপালেন তস্মৈ ৱরা-
নষ্টৈশ্বর্যমুখান্ প্রদায দদিথ স্বেনৈৱ চান্তে ৱধম্॥ ১ ॥

সত্যং কর্তুমথার্জুনস্য চ ৱরং তচ্ছক্তিমাত্রানতং
ব্রহ্মদ্বেষি তদাখিলং নৃপকুলং হন্তুং চ ভূমের্ভরম্।
সঞ্জাতো জমদগ্নিতো ভৃগুকুলে ত্বং রেণুকাযাং হরে
রামো নাম তদাত্মজেষ্ৱৱরজঃ পিত্রোরধাঃ সম্মদম্॥ ২ ॥

লব্ধাম্নাযগণশ্চতুর্দশৱযা গন্ধর্ৱরাজে মনা-
গাসক্তাং কিল মাতরং প্রতি পিতুঃ ক্রোধাকুলস্যাজ্ঞযা।
তাতাজ্ঞাতিগসোদরৈঃ সমমিমাং ছিত্ত্বাথ শান্তাত্ পিতু-
স্তেষাং জীৱনযোগমাপিথ ৱরং মাতা চ তেদাদ্বরান্॥ ৩ ॥

পিত্রা মাতৃমুদে স্তৱাহৃতৱিযদ্ধেনোর্নিজাদাশ্রমাত
প্রস্থাযাথ ভৃগোর্গিরা হিমগিরাৱারাধ্য গৌরীপতিম্।
লব্ধৱা ততপরশুং তদুক্তদনুজচ্ছেদী মহাস্ত্রাদিকং
প্রাপ্তো মিত্রমথাকৃতৱ্রণমুনিং প্রাপ্যাগমঃ স্বাশ্রমম্॥ ৪ ॥

আখেটোপগতোর্জুনঃ সুরগৱীসম্প্রাপ্তসম্পদ্গণৈ-
স্তৱতপিত্রা পরিপূজিতঃ পুরগতো দুর্মন্ত্রিৱাচা পুনঃ।
গাং ক্রেতুং সচিৱং ন্যযুঙক্ত কুধিযা তেনাপি রুন্ধন্মুনি-
প্রাণক্ষেপসরোষগোহতচমূচক্রেণ ৱতসো হৃতঃ॥ ৫ ॥

শুক্রোজ্জীৱিততাতৱাক্যচলিতক্রোধোথ সখ্যা সমং
বিভ্রদধ্যাতমহোদরোপনিহিতং চাপং কুঠারং শরান্।
আরূঢঃ সহৱাহযন্তৃকরথং মাহিষ্মতীমাৱিশন
ৱাগভির্ৱতসমদাশুষি ক্ষিতিপতৌ সম্প্রাস্তথাসসঙগরম্॥ ৬ ॥

পুত্রাণামযুতেন সপ্তদশভিশ্চাক্ষৌহিণীভির্মহা-
সেনানীভিরনেকমিত্রনিৱহৈর্ৱ্যাজৃম্ভিতাযোধনঃ।
সদ্যস্ত্ৱতককুঠারবাণৱিদলন্নিশশেষসৈন্যোতকরো
ভীতিপ্রদ্রুতনষ্টশিষ্টতনযস্তৱামাপতদ্ধেহযঃ॥ ৭ ॥

লীলাৱারিতনর্মদাজলৱলল্লঙকেশগর্ৱাপহ-
শ্রীমদবাহুসহস্রমুক্তবহুশস্ত্রাস্ত্রং নিরুন্ধন্নমুম্।
চক্রে ত্ৱয্যথ ৱৈষ্ণৱেপি ৱিফলে বুধৱা হরিং ত্ৱাং মুদা
ধ্যাযন্তং ছিতসর্ৱদোষমৱধীঃ সোগাত্ পরং তে পদম্॥ ৮ ॥

ভূযোমর্ষিতহেহযাত্মজগণৈস্তাতে হতে রেণুকা-
মাঘ্নানাং হৃদযং নিরীক্ষ্য বহুশো ঘোরাং প্রতিজ্ঞাং ৱহন্।
ধ্যানানীতরথাযুধস্ত্ৱমকৃথা ৱিপ্রদ্রুহঃ ক্ষত্রিযান
দিকচক্রেষু কুঠারযন্ ৱিশিখযন্ নিঃক্ষত্রিযাং মেদিনীম্॥ ৯ ॥

তাতোজ্জীৱনকৃন্নৃপালককুলং ত্রিসসপ্তকৃত্ৱো জযন
সন্তর্প্যাথ সমন্তপঞ্চকমহারক্তহ্রদৌঘে পিতৄন্।
যজ্ঞে ক্ষ্মামপি কাশ্যপাদিষু দিশন্ সালৱেন যুধ্যন্ পুনঃ
কৃষ্ণোমুং নিহনিষ্যতীতি শমিতো যুদ্ধাত্ কুমারৈর্ভৱান্॥ ১০ ॥

ন্যস্যাস্ত্রাণি মহেন্দ্রভূভৃতি তপস্তন্ৱন্ পুনর্মজ্জিতাং
গোকর্ণাৱধি সাগরেণ ধরণীং দৃষ্টৱার্থিতস্তাপসৈঃ।
ধ্যাতেষৱাসধৃতানলাস্ত্রচকিতং সিন্ধুং স্রুৱক্ষেপণা-
দুতসার্যোদধৃতকেরলো ভৃগুপতে ৱাতেশ সংরক্ষ মাম্॥ ১১ ॥

**********

www.prapatti.com